# केन्द्रीयसंस्कृतविश्वविद्यालयः

(संसदः अधिनियमेन स्थापितः)

## श्रीराजीवगान्धीपरिसरः शृङ्गेरी - ५७७१३९

## न्यायविद्याशाखया प्रवर्तितायाः

# न्यायभाष्यानुचिन्तनम्

(शोभकृत्-पुष्यशुक्लसप्तमीतः त्रयोदशीपर्यन्तम् [१७-२३/०१/२०२४] )

## इति विषयिण्याः राष्ट्रियकार्यशालायाः प्रतिवेदनम्




**Conviner**

*Prof. Naveen Holla*

*HOD, Dept. of Nyaya*

**Coordinator**

*Dr. Shamasundara A*

*Dr. Raghavendra P. Arolli*


## Report on the National Workshop on Nyāyabhāṣyanucintanam held in January 2024

# कार्यशालासमितिः

**(WORKSHOP COMMITEE)**



**प्रो.हंसधर झाः**

मार्गदर्शकः



**प्रो. नवीन होळ्ळः**

समन्वयकः



**डा. श्यामसुन्दरः ए.**

संयोजकः



**डा. राघवेन्द्रः पी. आरोळ्ळी**

संयोजकः

# न्यायभाष्यानुचिन्तनम्

केन्द्रीयसंस्कृतविश्वविद्यालयस्य आदेशानुसारं (दिनाङ्कः - 14-09-2023 , पत्रसं. - के.सं.वि./प्रका.एवं कार्य./104-08/2023-24/688), तदनु श्रीराजीवगान्धीपरिसरस्य आदेशानुसारं (पत्रसं. CSU/RGCS/A-12/2023-24/955) अस्माकं परिसरे न्यायविद्याशाखया न्यायभाष्यानुचिन्तनम् इति विषयिणी सप्तदिनव्यापिनी राष्ट्रियकार्यशाला १७-०१-२०२४ तः २३-०१-२०२४ पर्यन्तं समायोजिता । तत्रापि प्राचीनन्यायस्य कुण्ठितप्रचारत्वात् छात्रेभ्यः अध्यापकेभ्यश्च प्राचीनन्यायस्थानां विषयाणां परिचयाय सुबोधाय च न्यायभाष्यानुचिन्तनम् इति विषयोऽयम् अस्माभिः समादृतः आसीत् । तत्र प्राचीनन्यायविद् विद्वान् उमाकान्तभट्टवर्यः भाष्याध्यापनाय, तदन्तेवासी डा. मधुसूदन-अडिगवर्यश्च अध्यापितविषयाणां चिन्तनार्थं सम्प्रार्थितौ । तौ च परिसरं समागत्य कार्यशालालक्ष्यानुरोधेन पाठनं चिन्तनं च कारितवन्तौ । एतादृशस्य अपूर्वस्य कार्यक्रमस्य प्रतिवेदनम् इह प्रदीयते ।

## कार्यशालायाः विषयः, समयः, प्रचारश्च




कार्यशालायाः सुष्ठु निर्वर्तनार्थम् न्यायविभागसमन्वयकस्य आचार्यस्य नवीनहोळ्ळवर्यस्य मार्गदर्शने एका समितिः निर्मिता ।

सा च समितिः न्यायभाष्यस्य आदौ विद्यमानान् विषयान् स्वीकृत्य शोभकृत्-पुष्य-शुक्ल-सप्तमीतः त्रयोदशीपर्यन्तं कार्यशाला आयोजनीया, तत्र च आचार्यः उमाकान्तभट्टवर्यः मुख्यवक्तृत्वेन समाह्वातव्यः इति निरणयत् । कार्यशालायाः विषयदिनाङ्कादेः निर्णयानन्तरं प्रतिभागिनां संयोजनार्थं कार्यशालाविषयकं भित्तिपत्रं निर्माय वैद्युतिकमाध्यमेन (Whatsapp, Facebook, X) प्रसारः कृतः । तथा कर्णाटकराज्ये विद्यमानाभ्यः कलाशालाभ्यः छात्राणां गवेषकाणाम् अध्यापकानां च योजनार्थं सूचना प्रेषिता । पञ्जीकरणार्थं Google Form अपि निर्माय प्रसारितम् । तदनु वैद्युतिकमाध्यमेन कार्यशालायाम् अस्यां 69 सङ्ख्याकाः प्रतिभागिनः पञ्जीकरणं कृतवन्तः ।

साक्षात् भागग्रहणार्थं पञ्जीकृताः - ३५




वैद्युतिकमाध्यमेन भागग्रहणार्थं पञ्जीकृताः - ३४



# उद्घाटनम्









श्रीराजीवगान्धीपरिसरस्य सङ्गोष्ठीप्रकोष्ठे न्यायविद्याशाखायाः सप्तदिनव्यापिन्याः राष्ट्रियकार्यशालायाः उद्घाटनं शोभकृत्-पुष्य-शुक्ल-सप्तम्यां (१७-०१-२०२४ तमे दिने) प्रातः ०९.३० वादनसमये समभवत्। तत्र च कार्यशालायाः समुद्घाटनार्थं कार्यशालायां भाष्याध्यापनार्थं च प्राच्यन्यायवित् काव्यकुशलः आचार्यः उमाकान्तभट्टवर्यः, (प्रांशुपालचरः सर्वकारीयसंस्कृतमहाविद्यालयः मेलुकोटे) समाहूतः । महाभागश्च समागत्य कार्यशालामिमां दीपज्वालनेन स्ववाक्कुसुमैश्च समुदघाटयत् । अवसरेऽस्मिन् विश्वविद्यालयस्य कुलपतिः आचार्यः श्रीनिवासवरखेडीवर्यः वैद्युतिकमाध्यमेन समुद्घाटनभाषणेन समन्वग्रहीत् । तत्र च परिसरनिदेशकः, विद्याशाखासमन्वयकः अन्ये चाध्यापकाः समुपस्थिताः आसन् ।

# कार्यशालायाः सत्राणि

केन्द्रीयसंस्कृतविश्वविद्यालयस्य आदेशानुसारं यथा परिसरे कक्ष्याबाधो न स्यात् तथा कार्यशालासमायोजनं कर्तव्यमिति कार्यशालासमितिः निरणयत् । तदनु प्रतिदिनं प्रातः 9:00 वादनादारभ्यः 11:30 पर्यन्तं न्यायभाष्यस्य पङ्क्तिशः अध्ययनाय प्रथमं सत्रं न्ययोजयत् । एवमेव केवलाध्ययनेन अधीतस्य विषयस्य दृढता न सम्पद्यत इत्यतः 11:45 वादनतः 01:00 वादनपर्यन्तम् एकं चिन्तनसत्रमपि प्रत्येकस्मिन् दिने समायोजयत् । एतन्मध्ये शुक्रवासरे शनिवासरे च आधुनिकविज्ञानविषये छात्राणाम् उद्बोधनार्थं सत्रद्वयं पर्यकल्पयत् ।

## सत्राणां कानिचन चित्राणि









कार्यशालायाः प्रथमे दिने (दिनाङ्कः - १७-०१-२०२४) प्रातः ११.३० वादनतः ११.३० पर्यन्तम् न्यायभाष्यस्य प्रथमा कक्ष्या प्रवर्तिता । तत्र अध्यापकः - विद्वान् उमाकान्तभट्टवर्यः न्यायभाष्यस्य अध्यापनमकरोत् ।






तस्मिन्नेव दिने ११.४५ वादनतः ०१.०० पर्यन्तम् चिन्तनसत्रम् अपि प्रवर्तितम् । तत्रापि अध्यापकः विद्वान् उमाकान्तभट्टवर्यः चिन्तनसत्रं निरवहत् । तत्र कार्यक्रममम् डा. श्यामसुन्दरवर्यः समचालयत् ।




द्वितीयदिनादारभ्य आन्तं यावत् प्रतिदिनं प्रातः ०९:०० वादनतः ११:३० पर्यन्तम् अध्यापकः - **विद्वान् उमाकान्तभट्टवर्यः** न्यायभाष्यस्य अध्यापनमकरोत् । ततः ११:४५ वादनतः ०१:०० पर्यन्तम् **डा. मधुसूदन अडिगवर्यः** (सहायकप्राध्यापकः,श्रीकालभैरवेश्वरसंस्कृतवेदागममहाविद्यालयः आदिचुञ्चनगिरिः) चिन्तनसत्रं निरवहत् । आहत्य ९ अध्यापनसत्राणि ९ चिन्तनसत्राणि च प्रवर्तितानि एतेषु दिनेषु कार्यशालायाः संयोजकौ डा. श्यामसुन्दरः ए, डा. राघवेन्द्रः पी आरोल्ली इत्येतौ सत्राणि समचालयताम् ।



एतन्मध्ये शुक्रवासरे शनिवासरे च (दिनाङ्कः - १९ & २०-०१-२०२४) अपराह्ले २:३० वादनतः ४:३० पर्यन्तम् आधुनिकविज्ञानसम्बद्धे सत्रे समायोजिते ।




तत्र च प्रथमदिने **Dr. Anil Panigrahi**, Assistant Professor, Dept. of Molecular and Cellular Biology, Baylor college of medicine, Houston, इत्येषः महाभागः वैद्युतिकमाध्यमेन आधुनिकविज्ञानसम्बद्धान् विचारान् उदबोधयत् । तत्र च छात्राः विषयेऽस्मिन् चर्चां च विधाय प्रयोजनमवापुः। शनिवासरे च **Dr. T. K. Rajendra**, Member, Research advisory committee, CSU, Delhi इत्येषः महोदयः भारतीयविद्यानां वैज्ञानिकदृष्ट्या विश्लेषणं कृत्वा छात्रान् उदबोधयत् ।

## मूल्याङ्कनम्

कार्यशालायामस्यां प्रतिभागिनां निष्ठत्वावगमार्थम् एका परीक्षा अन्तिमदिने समारोहात् पूर्वम् आयोजिता । तत्र च Google Form उपयुज्य परीक्षायाः निर्वर्तनम् अभवत् । तेषु प्रायः सर्वेऽपि प्रतिभागिनः सोत्साहं भागमगृह्णन् । अङ्कद्वयस्य २० प्रश्नाः प्रदत्ताः आसन् ।



# समापनसत्रम्

श्रीराजीवगान्धीपरिसरस्य सङ्गोष्ठीप्रकोष्ठे न्यायविद्याशाखया प्रवृत्तायाः सप्तदिनव्यापिन्याः राष्ट्रियकार्यशालायाः समापनसत्रं शोभकृत्-पुष्य-शुक्ल-त्रयोदश्यां २३-०१-२०२४ तमे दिनाङ्के सायं ०४:०० वादनसमये समभवत् । इदं च सत्रं परिसरनिदेशकस्य **प्रो. हंसधर झावर्यस्य** आध्यक्ष्ये सुसम्पन्नम् । तत्र च मुख्याभ्यागतत्वेन **आचार्यः उमाकान्तभट्टवर्यः**, (प्रांशुपालचरः सर्वकारीयसंस्कृतमहाविद्यालयः मेलुकोटे) समुपस्थाय न्यायविद्यायाः सर्वव्यवहारेषु उपयोगः अवश्यमभ्युपगन्तव्य इति विषयं सोदाहरणम् उदबोधयत् । ततः परिसरनिदेशकः मुख्याभ्यागतश्च कार्यशालायामस्यां प्रतिभागिनां कृते प्रमाणपत्राणि व्यतारिषुः । ततः परं सभायाः अध्यक्षः परिसरनिदेशकः आचार्यः हंसधर झावर्यः आध्यक्षभणित्या उदबोधयत् ।












# कार्यशालायाः उद्देश्यम्

- अनया कार्यशालया प्राचीनन्याये तत्रापि भाष्यग्रन्थे अध्ययनं भवेदिति ।
- प्राचीनन्यायग्रन्थेषु अध्ययनक्रमस्य तत्रत्य-प्रमेयाणां च उद्बोधनम् ।
- प्रमाणभाष्यस्य आशयानां सङ्कलनम् ।
- विशिष्य इदमिदानीं प्रविष्टानां भाष्याध्ययनाद् वञ्चितानां च छात्राणां भाष्यविषयज्ञानम् ।
- कृतस्य भाष्याध्ययनस्य दृश्यश्रव्यमाध्यमेन संरक्षणम् ।

# कार्यशालायाः प्रयोजनम्

- न्यायभाष्यस्य सरलतया अध्ययनम् ।
- तत्रापि भाष्यस्य आदिमभागस्य सरलतया अवगमः ।
- सुश्राव्यभाषायाः आस्वादनम् ।
- प्राचीनन्यायग्रन्थेषु विद्यमानानाम् अपूर्वविषयाणाम् अवगमः ।
- लौकिकव्यवहारेषु तर्कसञ्चारस्य अवगमः ।

# व्ययविवरणम्

केन्द्रीयसंस्कृतविश्वविद्यालयः राष्ट्रियकार्यशालायाः समायोजनार्थं द्विलक्षपरिमितं (2,00,000/-) धनराशिं प्रादात् । तत्र च अभ्यागतप्रभृतीनाम् आवासभोजनादिव्यवस्था, सम्माननम् , अध्ययनसामग्रीणां सम्पादनम् , चित्रकणिकानां निर्माणमित्यादीनि कार्याणि सम्पादितानि । तस्य विवरणम् अधः प्रदत्तमस्ति -




# दृश्यकणिकाः

अस्याः कार्यशालायाः सर्वेषां सत्राणां दृश्यकणिकाः अधोनिर्दिष्टे सङ्केते संरक्षिताः सन्ति । अतः यथावसरम् एतान् आस्वादयितुं शक्नुवन्ति ।

**Videos of National Workshop 2024**



# धन्यवादाः

## निवेदयितारः

**प्रो. नवीन होळ्ळः**
समन्वयकः

**डा. श्यामसुन्दरः ए.**
संयोजकः

**डा. राघवेन्द्रः पी. आरोळ्ळी**
संयोजकः